जीविनः । चण्डालान्नं भूमिपान्नमजजीव्यश्वजीविनाम् । शौण्डिकान्नं सूतिकान्नं भुक्त्वा मासव्रती भवेदिति,’ शङ्खः । शूद्रस्याऽपि भोज्यविशेषस्य भक्ष्यतामाह सुमन्तुः गोरसञ्चैव शक्तूंश्च तैलं पिण्याकमेव च । अपूपान् भक्षयेच्छूद्रात् यच्चान्यत् पयसा कृतम् । कन्दुपक्वं तैलपक्वं पायसं दधि शक्तवः एतान्यशूद्रान्नभुजां भोज्यानि मनुरब्रवीदिति” हारीतः । “रजके चैव शैलूषे वेणुचर्म्मोपजीविनि । एतेषां यस्तु भुञ्जीत द्विजश्चान्द्रायणं चरेत् आप० । अन्त्यजान्नं यदा भुङ्क्ते शूद्रो मोहात् कदाचन एकरात्रोषितोभूत्वा दानं दत्त्वा विशुध्यति” संवर्त्तः “अभिशस्तपतितपौनर्भवश्वण्डपुंश्चल्यशुचिशस्त्रकारतैलिकचाक्रिकध्वजिसुवर्णकारलेख्यकशण्डतुन्नवायकबन्धकगणिकान्नानि च न भोज्यानि शौकरिकव्याधनिषादरजक वरुड-कैवर्त्तचर्मकारा अभोज्यान्ना अप्रतिग्राह्याश्च” सुम० । “पतितानां गृहं गत्वा भुक्त्वा च प्रतिगृह्य च मासोपवासं कुर्व्वीत” वृह० “चाण्डालपतितान्नभोजनेषु ततः पुनरुपनयनम्” वसि० । “पतितद्रव्यमादाय भुङ्क्ते च ब्राह्मणः क्वचित् । कृत्वा तस्य समुत्सर्गं यतिकृच्छ्रं चरेद्द्विजः” उश० । “चण्डालचाक्रिकलोहकारघाण्टिकान्नभोजने त्रिरात्रमुपवसेत्” हारीतः चाक्रिको वृषादिचक्रेण तैलनिष्पादनवृत्तिः । घाण्टिकः देवघण्टावादकः । ‘ध्वजिवणिक्किरीटिवार्द्धुषिकान्नभोजने पञ्चरात्रम्” हारीतः । ध्वजी शौण्डिकवृत्तिः वणिक् शिल्पोपजीवी । किरीटी वणिग्भेदः । “भगवृत्तिपुंश्चलीवेश्यान्नभोजने सप्तरात्रम् दुष्कृतिगरदतस्करान्नभोजने दशरात्रम् प्रव्रजितगणोद्दिष्टान्नभोजने दशरात्रं ताम्रकांस्यसीसककारव्याधिततक्षकान्नभोजने तप्तकृच्छ्रं ब्राह्मणवृत्तिघ्नबधबन्धोपघातवृत्त्यन्नभोजने च सङ्कीर्णान्नभोजने च असंस्कृतावत्सासरोषविक्रयान्नभोजने च” हारी० । भगवृत्तिर्मैथुनशुल्केन यस्य वृत्तिः गरदो विषदाता व्याधिजनकौषधदाता च “इतरे ये त्वभोज्यान्नास्तेषामन्नं विगर्हितम् अजाविके माहिषिके कूटे च वृषलीपतौ एतेषां भोजनं कृत्वा द्वादशाहं पयःपिबेत्” मनुः । अजाविकोऽजाविभ्यां वृत्तिमान् । माहिषिकः महिषेण वृत्तिमान् । कूटः अन्यन्मनसि अन्यद्वचसीत्यादिरूपकपटव्यवहारी ‘वन्ध्या तु वृषलीज्ञेया वृषली च मृतप्रजा । अपरा वृषली ज्ञेया कुमारी या रजस्वला” । उश० उक्ता तस्याः शूद्रायाश्च पतिः विष्णुः “गणगणिकास्तेनगायकान्नानि भुक्त्वा सप्तरात्रं पयसा वर्त्तेत तक्षणश्चान्नं चर्म्मकर्त्तुश्च वार्द्धुषिककदर्य्यस्य दीक्षितबद्धनिगडाभिशस्तानाञ्च पुंश्चलीदाम्भिकचिकित्सकलुब्धकक्रूरोच्छिष्टभोजिनाञ्च अवीरास्त्रीसुवर्णकारसंसर्गपतितानाञ्च पिशुनानृतवादिनाञ्च धर्म्मसोमविक्रयिणाञ्च शैलूषतुन्नवायकृतघ्नरजकानाञ्च कर्म्मकारनिषादरङ्गावतारिवेणुशस्त्रविक्रयिणाञ्च श्वजीविशौण्डिकतैलिकचेलनिर्णेजकानाञ्च भ्रूणघ्नावेक्षितमुदक्या संस्पृष्टं पतत्रिणावलीढं शुना संस्पृष्टं गवा घ्रातञ्च कामतः पदास्पृष्टमवक्षुतञ्च मत्तक्रुद्धातुराणाञ्च अनर्चितं वृथा मांसञ्च । यत्र नाश्नन्ति देवाश्च पितरश्च यथाविधि । वृथापाकः परिज्ञेयः तस्य नाद्यात् कथञ्चन । वृथापाकस्य भुञ्जानः प्रायश्चित्तं चरेत्” । ‘नवं कृषरपूपादि पायसं मधुसर्पिषी चण्डालेन शुना वापि दृष्टं हविरयज्ञियम् । विड़ालादिभिरुच्छिष्टं दुष्टमन्नं विवर्जयेत् अन्यत्र हिरण्योदकस्पर्शादिति” शाता० । हिरण्योदकस्पर्शस्येवान्नस्य, तापनादेः घृतादीनां शुद्धिकरत्वमाह सएव “तापनं घृततैलानां प्लावनं गोरसस्य च अन्त्यानां भुक्तशेषस्तु भक्षितोयैर्द्विजातिभिः । चान्द्रं कृच्छ्रं तदर्द्धं वा” उशनाः ‘कापालिकान्नभोक्तॄणां तन्नारीगामिनां तथा । ज्ञानात् कृच्छ्राब्दमुद्दिष्टम्” आप० । ‘अन्त्यावसायिनामन्नमश्नीयाद्यस्तु कामतः । शिशुचान्द्रायणं कुर्य्यादिति” अङ्गि० । “चण्डालपतितादीनामुच्छिष्टस्य च भक्षणे । द्विजः शुध्येत् पराकेण” अङ्गि० । “अमेध्यपतितचाण्डालपुक्कशरजस्वलाऽवधूतकुणिकुष्ठिकुनखिस्पृष्टानि भुक्त्वा कृच्छ्रमाचरेत्” शङ्खः । अमेध्यं मद्यभाण्डविण्मूत्रेत्यादि । पुक्कशः क्षत्रियायां शूद्राज्जातः प्रतिलोमजः वर्णसङ्करः । कुणिः स्वभावतः पाणिविकलः । “चाण्डालपतितामेध्यकुणपैः कुष्ठिना तथा उदक्यासूतिभिः स्पृष्टं भुक्त्वा मासं वने वसेदिति” ब्र०पु० । “अस्थ्यादिदूषितान्नञ्च भुञ्जानस्तु यदा भवेत् स्नात्वार्कमर्चयित्वा तु घृतं प्राश्य विशुध्यति” ब्र०पु० पतितादिस्पर्शे अकृतस्नानानामन्नमात्रस्याभक्ष्यता “महापातकिसंसर्गे स्नानमेव विधीयते संस्पृष्टस्तु यदा भुङ्क्ते तप्तकृच्छ्रं समाचरेत् स्नानार्हको यदा स्नानमकृत्वाश्नाति वै द्विजः । अहोरात्रोषितः स्नातः पञ्चगव्येन शुध्यति” पैठ० । “केशकीटावपन्नञ्च स्त्रीभिः स्पृष्टं तथैव च । सोदक्याशूद्रसंस्पृष्टं पञ्चगव्येन शुध्यति” जावा० । स्त्री भिन्नजातिस्त्री । केशकीटाद्युपहतस्य प्रोक्षणादिकं कृत्वा भक्ष्यमेव । ‘अवक्षुतं केशपतङ्गकीटैरुदक्यया वा पतितैश्च दृष्टम् । अलातमृद्भस्महिरण्यतोयैः संस्पृष्टमन्नं मनुराह भोज्यम्”